"त्रिदोषजे ज्वरे ह्येतदन्तर्व्वेगे च धातुगे ।
लक्षणं मोक्षकाले स्यादन्यस्मिन् स्वेददर्शनम् ॥"
एतद्दाहादिकं लक्षणं मोक्षकाले एतेष्वेव ज्वरेषु स्यात् । केषु त्रिदोषजे । अन्तर्व्वेगे । धातुगे ज्वरे । अन्यस्मिन् स्वेदमात्रं दर्शनं भवति ॥ * ॥
अथ ज्वरमुक्तस्य लक्षणमाह ।
"देहो लघुर्व्यपगतक्लममोहतापः
पाको मुखे करणसौष्ठवमव्यथत्वम् ।
स्वेदः क्षवः प्रकृतियोगिमनोऽन्नलिप्सा
कण्डूश्च मूर्ड्ध्नि विगतज्वरलक्षणानि ॥"
सुश्रुतोऽप्याह ।
"स्वेदो लघुत्वं शिरसः कण्डूः पाको मुखस्य च ।
क्षवथुश्चान्नकाङ्क्षा च ज्वरमुक्तस्य लक्षणम् ॥" * ॥
अथ ज्वरमुक्तस्य नियमाः ।
"व्यायामञ्च व्यवायञ्च स्नानं चंक्रमणानि च ।
ज्वरमुक्तो न सेवेत यावन्न बलवान् भवेत् ॥"
अन्यच्च ।
"व्यायामञ्च व्यवायञ्च प्रवातं शिशिरं जलम् ।
ज्वरमुक्तो न सेवेत यावन्न बलवान् भवेत् ॥
अपि ज्वरविमुक्तस्य स्नानं कुर्य्यात् पुनर्ज्वरम् ।
तस्माज्ज्वरविमुक्तोऽपि स्नानं विषमिव त्यजेत् ॥
बलवर्णाग्निवपुषां यावन्न प्रकृतिर्भवेत् ।
तावज्ज्वरेण मुक्तोऽपि वर्ज्जनीयानि वर्ज्जयेत् ॥"
अथ वातज्वराधिकारः । तत्र वातज्वरस्य विप्रकृष्टसन्निकृष्टकारणकथनपूर्व्विकां संप्राप्तिमाह ।
"वातलाहारचेष्टाभ्यां वायुरामाशयाश्रयः ।
बहिर्निरस्य कोष्ठाग्निं ज्वरकृत् स्याद्रसानुगः ॥"
अथ तस्य पूर्व्वरूपमाह । जृम्भात्यर्थं समीरणादिति । समीरणात् ज्वरे उत्पत्स्यति अत्यर्थं जृम्भा स्यात् । जृम्भा च श्रमादिपूर्व्विका भवति॥
अथ वातज्वरस्य लक्षणमाह ।
"वेपथुर्व्विषमो वेगः कण्ठौष्ठमुखशोषणम् ।
निद्रानाशः क्षवस्तम्भो गात्राणां रौक्ष्यमेव च ॥
शिरोहृद्गात्ररुग्वक्त्रवैरस्यं बद्धविट्कता ।
शूलाध्माने जृम्भणञ्च भवत्यनिलजे ज्वरे ॥"
एतानि लक्षणानि प्रायो भावित्वेन सुश्रुतेन निर्द्दिष्टानि । चकारादन्यान्यपि चरकनिदानोक्तानि बोद्धव्यानि । तान्येव श्लोकेन प्रदर्शयन्ति ।
"भवन्ति विविधा वातवेदना स्पादसुप्तता ।
पिण्डिकोद्वेष्टनं कर्णस्वनो वक्त्रकषायता ॥
ऊरुसादो हनुस्तम्भो विश्लेषः सन्धिजानुनोः ।
शुष्ककासो वमिर्लोमहर्षो दन्तहर्षः श्रमभ्रमौ ॥
अरुणं नेत्रमूत्रादि तृट् प्रलापोष्णकामिता ॥"
विषमो वेगः शरीरोष्णतादिरूपो ज्वरवेगो विषमो भवतीत्यर्थः । क्षवस्तम्भः छिक्काया अभावः । तथा च वाग्भटः ।
"हर्षो रोमाङ्गदन्तेषु वेपथुः क्षवथोर्ग्रहः ॥" इति ।
चरकोऽपि । क्षवथूद्गारनिग्रह इति । शिरोहृद्गात्ररुक् गात्रपदे प्रयुक्ते शिरोहृच्छब्दप्रयोगस्तत्र विशेषेण वेदनाबोधनार्थः ॥ * ॥

अथ वातज्वरचिकित्सा ।
"आमाशयस्थो हत्वाग्निं सामो मार्गान्
पिधापयन् ।
विदधाति ज्वरं दोषस्तस्माल्लङ्घनमाचरेत् ॥"
इति वचनात् सामान्यतो ज्वरिमात्रस्य यावदारोग्यदर्शनं लङ्घनाभिधाने वातज्वरिणो लङ्घनविधाने विशेषमाह चरकः ।
"ज्वरितं षड़हेऽतीते लघ्वन्नं प्रतिभोजितम् ।
पाचनं शमनीयंवा कषायं पाययेद्भिषक् ॥"
सुश्रुतोऽप्याह ।
"वातिके सप्तरात्रेण दशरात्रेण पैत्तिके ।
श्लैष्मिके द्वादशाहेन ज्वरे युञ्जीत भेषजमिति ॥"
ननु अन्नं वै प्राणिनः प्राणा इति श्रुतिः तदन्नं विना प्राणिभिः कथं स्थातव्यमित्याह ।
"दोषाणामेव सा शक्तिर्लङ्घने या सहिष्णुता ।
न हि दोषक्षये कश्चित् सोढुं शक्नोति लङ्घनम् ॥
कफपित्ते द्रवे धातू सहेते लङ्घनं बहु ।
आमक्षयादूर्द्धमपि वायुर्न सहते क्षणम् ॥" * ॥
भेषजमाह ।
"श्रीफलः सर्व्वतोभद्रा कामदूती च शोणकः ।
तर्कारी गोक्षुरः क्षुद्रा बृहती कलसी स्थिरा ॥
रास्ना कणा कणामूलं कुष्ठं शुण्ठी किरातकः ।
मुस्ताम्रृता बला बालं द्राक्षा यासः शताह्विका ॥
एषां क्वाथो निहन्त्येव प्रभञ्जनकृतं ज्वरम् ।
सोपद्रवश्च योगोऽयं सर्व्वयोगवरः स्मृतः ॥"
श्रीफलो विल्वः । सर्व्वतोभद्रा गम्भारी । कामदूती पाटला । शोणकः शोनापाठा इति लोके । तर्कारी गणिकारिका । कलसी पृश्निपर्णी । स्थिरा शालिपर्णी । बालं सुगन्धबाला । यासो यवासः । इति दशमूलादिक्वाथः ॥ * ॥
सुश्रुतस्तु ।
"पञ्चमूली कषायन्तु पाचनं वातिके ज्वरे ।" इति ।
अत्र पञ्चमूली बृहत्पञ्चमूली । अतएव त्रिशती ।
"श्रीपर्णी तर्कारी श्रीफलटुण्टुकपाटलामूलैः ।
पाचनमुदितं मारुतजनितज्वरहारिवारिणि
कथितैः ॥"
इति बृहत्पञ्चमूली क्वाथः ॥ * ॥
"किराताब्दामृतोदीच्यबृहतीद्वयगोक्षुरैः ।
त्रिपर्णीकलसीविश्वैः क्वाथो वातज्वरापहः ॥"
उदीच्यं बालकम् । त्रिपर्णी शालिपर्णी । कलसी पृश्निपर्णी । इति किरातादिक्वाथः ॥ * ॥
"गुड़ूचीपिप्पलीमूलनागरैः पाचनं स्मृतम् ।
वातज्वरे तथा पेयं कालिङ्गं सप्तमेऽहनि ॥"
कालिङ्गं शृतं ऐन्द्रयवं शृतम् ॥ * ॥
त्रिशती ।
"विश्वाम्रृताग्रन्थिकसिद्धतोयं
मरुज्ज्वरस्यापिबतः कुतोऽयम् ।
क्वाथोऽथ कुस्तुम्बुरुदेवदारुक्षुद्रौषधैः पाचनमत्र चारु ॥"
औषधं शुण्ठी । क्वाथः पाचनमिति । वेदाः प्रमाणमितिवत् ।
"पञ्चमूलीबलारास्नाकुलत्थैः सह पुष्करैः ।
क्वाथो हन्त्याच्छिरःकम्पं पर्व्वभेदं मरुज्ज्वरम् ॥"
पञ्चमूली विल्वादिः । इति बृहत्पञ्चमूल्यादिक्वाथः ॥
"कणारसोनामृतवह्निविश्वा-
निदिग्धिकासिन्धुकभूमिनिम्बैः ।
समुस्तकैराचरितः कषायो
हिताशिनां हन्ति गदानिमांस्तु ॥
ज्वरं मरुद्दुष्टिसमुद्भवं तथा
बलासजस्थानलमन्दताञ्च ।
कण्ठावरोधं हृदयावरोधं
स्वेदञ्च रोमाञ्चहिमत्वमोहान् ॥"
इति कणादिक्वाथः ॥ * ॥
"शुद्धं शङ्करशुक्रमक्षतुलितं मारारिगौरीरजस्तावन्तावदुमापतिस्फुटगलालङ्कारवस्तु स्फुटम् ।
तावत्येव मनःशिला च विमला तावत्तथा टङ्कणं
षड्भी द्वाक्षमिता कणा च मरिचं दिक्पाल-
संख्याष्टकम् ॥
विषादि वस्तूनि शिलोपरिष्टा-
द्विचूर्णयेद्वासरमेव शोधयेच्च ।
ततस्तु खल्ले रसगन्धकौ च
चूर्णञ्च तद्यामयुगं विमर्द्य ॥
कल्पतरुनामधेयो यथार्थनामा रसः श्रेष्ठः ।
समीरणश्लेष्मगदान् हरते मानास्य गुञ्जैका ॥
आर्द्रकेण सममेष भक्षितो
हन्ति वातकफसम्भवं ज्वरम् ।
श्वासकासमुखसेकशीतता-
वह्निमान्द्यविरुचींश्च नाशयेत् ॥
नस्येनाश्वेव हरति शिरोऽर्त्तिं कफवातजाम् ।
मोहं महान्तमपि च प्रलापं क्षवथुग्रहम् ॥"
कल्पतरुरसः । सामान्यज्वरचिकित्सोक्तो महाज्वराङ्कुशः प्रदेयोऽत्र ॥ * ॥
"विषमहौषधमागधिकोमया
कुमणिरक्तकमार्द्रकमर्द्दितम् ।
क्रमविवर्द्धितसुद्दलितज्वर-
स्त्रिपुरभैरव एष रसो वरः ॥"
कुमणिः मारितं ताम्रं तस्य भागाः पञ्च ।
रक्तकं हिङ्गुलं तस्य मात्राः षट् । मात्रास्य रक्तिकाद्वयम् । त्रिपुरभैरवो रसो ज्वरे ॥ * ॥
"वातश्लेष्मज्वरे स्वेदं जत्रुपार्श्वास्थिशूलिनि ।
पीनसश्वासबाधिर्य्ये कारयेत्तद्विधानवित् ॥
स्रोतसां मार्द्दवं कृत्वा नीत्वा पावकमाशयम् ।
हत्वा वातकफस्तम्भं स्वेदो ज्वरमपोहति ॥
"खर्परभ्रष्टपटस्थितकाञ्जिकसंसिक्तवालुकास्वेदः
शमयति वातकफामयमस्तकशूलाङ्गमर्द्दा-
दीन् ॥"
वालुकास्वेदः कम्पे शिरोहृदयगात्रव्यथायां जृम्भायाम् । पादसुप्ततायां पिण्डिकोद्वेष्टने ऊरुसादे हनुस्तम्भे लोमहर्षे च ॥ * ॥
"मातुलुङ्गफलकेशरो धृतः
सिन्धुजन्ममरिचान्वितो मुखे ।
हन्ति वातकफरोगमाशुग
शोषमाशु जड़तामरोचकम् ॥"
इति कवलः कण्ठौष्ठमुखशोषे । *